# Ravanakrita Shiva Stuti

# रावणकृता शिवस्तुतिः

## Document Information

Text title : Ravanakrita Shiva Stuti

File name : shivastutiHrAvaNakRRitA.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 46 - rAvaNakRitastuti | 60-84||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# रावणकृता शिवस्तुतिः

ईश्वरः -
सुराणां गर्वनाशार्थं सृष्टो विश्रवसस्सुतः ।
विष्णुश्च भृगुशापेन मानुषेषु जनिष्यति ॥ ६०॥

तस्य भार्यापहरणान्मुनिसम्पीडनादपि ।
कदाचिदागाद्धर्षेण कैलासं मम रावणः ॥ ६१॥

अखर्वगर्वसङ्क्रान्तः कैलासस्यापि गर्वहृत् ।
तोलयामास बाहुभ्यां कैलासं ममशैलजे ॥ ६२॥

कैलासश्चालितस्तेन नानालिङ्गसमाश्रयः ।
महामन्योर्मम तदा मन्युनासोऽधरीकृतः ॥ ६३॥

तेन स्तुतोऽस्मिवेदैश्च वेदवेद्योऽहमीश्वरि ।
साम्ना सहस्रं शरदां तुष्टावाष्टाकृतिं हिमाम् ॥ ६४॥

मदङ्गुष्ठाग्रनिर्मग्नधरणीधरमूलगैः ।
बाहुभिः पीडितो देवि दशास्यैर्मामरोरवीत् ॥ ६५॥

दयया मोचितंरक्षस्तदास्तोत्रेणमांस्तुवत् ।
स्तुत्वानत्वानिर्जगामदिशम्मेनावलोकयन् ॥ ६६॥

कैलासोऽपि महादेवि त्यक्तगर्यो बभूव ह ॥ ६७॥

देवी -
कथं तेन महादेव संस्तुतोऽसि वदाद्य तम् ।
किं वा तेन तपस्तप्तं श्रोतुमिछास्ति मे प्रभो ॥ ६८॥

ईश्वरः -
तत्स्तुतिं सावधानेन पार्वति शृणु ते वदे ।
रावणो रोरवीद्देवि मच्छैलवरमूलगः ॥ ६९॥

दीनस्वरोऽतिविकृतं साम्ना(सास्रा)विलविलोचनः ॥ ७० ॥

- -

रावणः -

ताराराजविराजमानमकुटं काकोदराकल्पकं
कर्पूराभशरीरकान्तिविलसन्माराङ्गभस्मादरम् ।
कैलासाचलतोलनेन कुपिताङ्गुष्ठाग्रसम्पीडितः ॥

शैलाघातस्यबाहुभग्नजरठद्वैराजसामश्रवा-
दुन्मुक्ताखिलरावणं पुरहरं देवं भजे शङ्करम् ॥ ७१ ॥

वैराजराजनगहिङ्कृतिकातितुष्टं राजच्छशाङ्कन्धवलं ललितोत्तमाङ्गम् ।
यक्षाधिराजकृतसख्यमुमासहायं देवं नमामि सुरराजकृतप्रणामम् ॥ ७२ ॥

इलाधरताभियं वरमुनन्दिवाहप्रियं सुरेन्द्रवरसुप्रियं प्रभवकुन्दमालाप्रियम् ।
मुकुन्दनयनार्चितं भवहरं सुमेरुस्थितं रमारमणसुन्दराक्षियुगपूजितं शङ्करम् ॥ ७३ ॥

गन्धबन्धमधुरालकलोलं रुद्रनेत्रसुचरित्रमपारम् ।
दयानिधानाखिलमित्रशक्ते कृपाम्बुधे कामद कामवैरिन् ॥ ७४ ॥

स्तौमि प्रकृष्टवचसा परमेश मित्र सामैर्भवन्तमगतः परिमोचयाशु ॥ ७५ ॥

पर्वानन्दितशर्वरीरमणवत्कान्तेन्दुधामानन
गात्रार्धाधिकृतस्वकान्तिवदने नेत्रे च मौलौ तथा ।
देवेशेन सदैव शोभितकलायुक्तेन बालाङ्कधृक्ताद्दक्षं
जगतां गुरुं त्रिजगतां पापापहं तम्भजे ॥ ७६ ॥

- -

ईश्वरः -

एवं तुष्टाव चाष्टाकृतिमखिलतनूद्धासिकोशैककाशं
मामीशं जगदार्तिनाशनमुमे चार्तस्तदा रावणः ।
कैलासाचलतो विमुक्तभुजधृङ्मत्वा ययौ धामकं
लङ्कामूलनिकेतनं मम सदा लिङ्गार्चकश्शङ्करि ॥ ७७ ॥

सुरशरगजजोरुसद्विषाणैः परिधृतकिणतः किणाक्तवक्षाः ।
(सुरशरगजजोरुसद्विषाणैः परिधृष्टःप्रणतः किणत्सुवक्षाः ।)
रणभुवि रावितदेवराजसङ्घः पणितप्राणगणस्तरावणेशः ॥ ७८ ॥

(रणभुवि रावितदेवराजसङ्घः पणितप्राणगणेशरावणोऽद्रिकन्ये) ॥ ७८ ॥

नालीकासननन्दनोद्भवभवः पौलस्त्य एषोऽम्बिके
मामाराध्य गणेन्द्रतामगसुते प्राप्तो ह्यवध्यस्सुरैः ।
येनाकारि तपस्स्वकीयमनलेचोत्कृत्य मांसञ्जहौ ॥ ७९॥

मल्लिङ्गे विवादयं स्वशिरसः पद्मालिमालां पुरा
भ्रातृभ्यां निजवीर्यनिर्जितमहासीमैकभूमायशः ॥ ८०॥

वैरूपवैराजबृहद्रथन्तरैश्श्रीवामदेव्यैर्वररुद्रशाङ्करैः ।
श्रीरैवतेलाधरकैर्महेन्द्रैर्महाष्टदंष्ट्रावरवैश्वमित्रैः ॥ ८१॥

तुष्टाव सामैश्शशिमौलिमम्बिके ।
सरावणोरावितसर्वलोको रवैस्तदा सामसुगानतोषितम् ॥ ८२॥

धीरोदारपयोजजापतिकृतापाराविन्दार्चना-
त्तुष्टं कष्टहरं प्रकृष्टवचसा स्रष्ट्रा पुनस्संस्तुतम् ।
त्वष्ट्रा शातकराब्जगन्धसहनासक्तैरवी ॥ ८३॥

मित्रायेऽद्य शिवस्य नेत्रनिवहाः पान्त्वद्यदृष्ट्यादिमां
तेनैवामितगन्धपर्वतमहापापादपायाच्छिवः ॥ ८४॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये रावणकृता शिवस्तुतिः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ४६ - रावणकृतस्तुति । ६०-८४॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 46 - rAvaNakRRitastuti . 60-84..

Notes:
Īshvara Ishvara narrates to Devī देवी; the story of Rāvaṇa रावण (a.k.a Paulastya पौलस्त्य), who in an attempt to lift the Kailāsa कैलास gets his arms caught under its weight as Śiva शिव stabilizes Kailāsa कैलास with His Great Toe. Rāvaṇa रावण; realising his folly, eulogises Śiva शिव to free his arms, and appeases Him with Sāmagāna सामगान.

Encoded and proofread by Ruma Dewan

*Ravanakrita Shiva Stuti*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*